# Shodashayudhastotram

# ષોડશાયુધસ્તોત્રમ્

## Document Information

Text title : ShoDashAyudhastotram

File name : ShoDashAyudhastotram.itx

Category : vishhnu, vedAnta-deshika, vishnu

Location : doc_vishhnu

Author : vedAntadeshika

Proofread by : PSA Easwaran psawaswaran

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# ષોડશાયુધસ્તોત્રમ્

વેદાન્તદેશિકવિરચિતમ્ ।

(શ્રીસુદર્શનદેવસ્ય કરસ્થાયુધસ્તુતિઃ)

સ્વસઙ્કલ્પકલાકલ્પૈરાયુધૈરાયુધેશ્વરઃ ।
જુષ્ટઃ ષોડશભિર્દિવ્યૈર્જુષતાં વઃ પરઃ પુમાન્ ॥ ૧॥

યદાયત્તં જગચ્ચક્રં કાલચક્રં ચ શાશ્વતમ્ ।
પાતુ વસ્ત્વપરં ચક્રં ચક્રરૂપસ્ય ચક્રિણઃ ॥ ૨॥

યત્પ્રસૂતિશતૈરાસન્ દ્રુમાઃ પરશુલાઞ્છિતાઃ ।
સ દિવ્યો હેતિરાજસ્ય પરશુઃ પરિપાતુ વઃ ॥ ૩॥

હેલયા હેતિરાજેન યસ્મિન્ દૈત્યાઃ સમુદ્ધૃતે ।
શકુન્તા ઇવ ધાવન્તિ સ કુન્તઃ પાલયેત વઃ ॥ ૪॥

દૈત્યદાનવમુખ્યાનાં દણ્ડ્યાનાં યેન દણ્ડનમ્ ।
હેતિદણ્ડેશ દણ્ડોઽસૌ ભવતાં દણ્ડયેદ્વિષઃ ॥ ૫॥

અનન્યાન્વયભક્તાનાં રુન્ધન્નાશામતઙ્ગજાન્ ।
અનઙ્કુશવિહારો વઃ પાતુ હેતીશ્વરાઙ્કુશઃ ॥ ૬॥

સમ્ભૂય શલભાયન્તે યત્ર પાપાનિ દેહિનામ્ ।
સ પાતુ શતવક્ત્રાગ્નિહેતિર્હેતીશ્વરસ્ય વઃ ॥ ૭॥

અવિદ્યાં સ્વપ્રકાશેન વિદ્યારૂપશ્છિનત્તિ યઃ ।
સ સુદર્શનનિસ્ત્રિંશઃ સૌતુ વસ્તત્ત્વદર્શનમ્ ॥ ૮॥

ક્રિયાશક્તિગુણો વિષ્ણોર્યો ભવત્યતિશક્તિમાન્ ।
અકુણ્ઠશક્તિઃ સા શક્તિરશક્તિં વારયેત વઃ ॥ ૯॥

તારત્વં યસ્ય સંસ્થાને શબ્દે ચ પરિદૃશ્યતે ।
પ્રભોઃ પ્રહરણેન્દ્રસ્ય પાઞ્ચજન્યઃ સ પાતુ વઃ ॥ ૧૦॥

યં સાત્ત્વિકમહઙ્કારમામનન્ત્યક્ષસાયકમ્ ।
અવ્યાદ્ધ્રશ્ચક્રરૂપસ્ય તદ્ધનુઃ શાર્ઙ્ગિધન્વનઃ ॥ ૧૧॥

આયુધેન્દ્રેણ યેનૈવ વિશ્વસર્ગો વિવિચ્યતે ।
સ વઃ સૌદર્શનઃ કુર્યાત્પાશઃ પાશવિમોચનમ્ ॥ ૧૨॥

વિહારો યેન દેવસ્ય વિશ્વક્ષેત્રકૃષીવલઃ ।
વ્યજ્યતે તેન સારેણ નાસીરવિજયોઽસ્તુ વઃ ॥ ૧૩॥

આયુધાનામહં વજ્રં ઇત્યગીયત યઃ સ વઃ ।
અવ્યાદ્ધેતીશ વજ્રોઽસાવદધીચ્યસ્થિસમ્ભવઃ ॥ ૧૪॥

વિશ્વસંહૃતિશક્તિર્યા વિશ્રુતા બુદ્ધિરૂપિણી ।
સા વઃ સૌદર્શની ભૂયાદ્ગદપ્રશમિની ગદા ॥ ૧૫॥

યાત્યતિક્ષોદશાલિત્વં મુસલો યેન તેન વઃ ।
હેતીશ મુસલેનાશુ ભિદ્યતાં મોહમૌસલમ્ ॥ ૧૬॥

શૂલિદૃષ્ટમનોર્વાચ્યો યેન શૂલયતિ દ્વિષઃ ।
ભવતાં તેન ભવતાત્ત્રિશૂલેન વિશૂલતા ॥ ૧૭॥

અસ્ત્રગ્રામસ્ય કૃત્સ્નસ્ય પ્રસૂતિં યં પ્રચક્ષતે ।
સોઽવ્યાત્સુદર્શનો વિશ્વમાયુધૈઃ ષોડશાયુધઃ ॥ ૧૮॥

શ્રીમદ્વેઙ્કટનાથેન શ્રેયસે ભૂયસે સતામ્ ।
કૃતેયમાયુધેન્દ્રસ્ય ષોડશાયુધસંસ્તુતિઃ ॥ ૧૯॥

ઇતિ વેદાન્તદેશિકવિરચિતં ષોડશાયુધસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

---

*Shodashayudhastotram*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*